# शिक्षासमुच्चय

अथ शीक्षां प्रवक्ष्यामि पाणिनीय मतं यथा
शास्त्रानुपूर्वं तं विद्यात् यथोक्तं लोकवेदयोः १
प्रसिद्धमपि शास्त्रार्थमविज्ञातविबुद्धिभिः
पुनर्व्यक्तिं करिष्यामि वाच उच्चारणे विधिम् २
त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शंभुमते मताः
प्राकृतेस्संस्कृते वापि स्वयं प्रोक्तः स्वयंभुवाः ३
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः
यदयश्च स्मृता ह्यष्टौ चत्वारश्च यमा स्मृताः ४
अनुस्वारो विसर्गश्चः कःपौ च पराश्रयौ
दुस्पृष्टश्चेति वर्णानां लृकारः प्लुतमेच च ५
चतुष्षष्टिरिमे वर्णाः प्रोक्ताः पाणिनिना स्वयम्
स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ६
द्वितीयाश्च तृतीयाश्च चतुर्त्था क्षत्रिया स्मृताः
वर्गाणामुत्तमा वैश्या अन्तस्थाश्च तथैव च ७
अनुस्वारो विसर्गश्च शूद्रा ब्राह्मण एव च
कथं वर्णास्तु वर्णानां ब्राह्मणक्षत्रियादयः ८
स्वकालात् पाद एव स्यात् ब्राह्मणानां तु कथ्यते
तदर्द्धं क्षत्रियादीनां शास्त्रा दृष्ट्यानुवर्त्तते १०
कैश्चित्पादस्तु सर्वेषां व्यञ्जनानाञ्च कथ्यते
करेणुः कर्वणी चैव हरिणी हारितेति च ११
हंसपादे तु विज्ञेया पञ्चैता स्वरभक्तयः
करेणुर्म्रहयोर्विद्यात् कर्वणी रहकारयोः १२
हरिणीं म्रशसोराहु हारितां रयकारयोः
या तु हंसपदा नाम सा तु रेफषकारयोः १३

एवं पञ्चविधां भक्तिमुच्चरेत्स्वर्गकामुकः
रेफस्य तु द्विमात्रं स्यादृकारस्त्वर्धमात्रिकः १४
लकारः पादमात्रेण लृकारश्च पुनः पुनः
हरिणी त्वार्धमात्रा स्याद्धारितादद्विपदाधिकाः १५
हंसपादे त्रिपादस्यामात्राधिकिन्तवा भवेत्
शषसेषु स्वरोदायां हकारे व्यञ्जनोदयाम् १६

अन्तिमश्लोकाः
इति समुच्चारप्रकरणम्
न वेदविदुषो विप्राः सर्वशास्त्रमधीयते सर्वाभरणसंपत्तिर्नग्नस्
त्रीयुवोद्ध्रुवः
अधीतमपि यो वेदं विमुञ्चति यदा द्विजः
भ्रूणहास तु विज्ञेयो वियोनिमधिगच्छति
नातिक्रामेद्यथाशक्तिमध्यापनमवश्यकम्
अशुश्रोषोर्नदद्याद्वै नरको नात्र संशयः ।
वेदस्य पाठमात्रेण विगतदुष्कृतो भवेत्
कुलमग्नौ यथा क्षिप्तं पापराशि प्रणश्यति
पदक्रमविशेषचार्यसंसदम्
नित्यस्वाध्यायशीलत्वं दया सत्यञ्च संगमः
तेन शुद्धिमवाप्नोति देवत्वमधिगच्छति
छन्दपादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते
शीक्षा व्याघ्रं तु वेदस्या मुखं व्याकरणं स्मृतम्
तस्मात्सांगमधीत्यैवा ब्रह्मलोके महीयते

# इति शीक्षासमुच्चयं समाप्तम्